संस्कृतवार्ताः

13.04.2024

सायम् - 06:20

मुख्यवार्ता:

· लोकसभा-निर्वाचनस्य प्रथमचरणस्य मतदानात् पूर्वं प्रमुख-राजनीतिक-दलानां नेतृभि: मतदातृन् आक्रष्टुं नैर्वाचनिक-प्रचाराभियानं तीव्रीकृतम्।

· प्रशासनेन द्विदलानां निजव्यवसाये संलग्नेभ्य: जनेभ्य: आवश्यक-वस्तु-अधिनियमस्य प्रावधानानाम् अन्तर्गतं दण्डस्य प्रत्यादेश: प्रदत्त:।

· देशेन अद्य जलियांवाला-बाग-नरसंहारस्य वीरसैनिका: स्मर्यन्ते। राष्ट्रपति: उपराष्ट्रपति: प्रधानमन्त्री नेतारश्च जलियांवाला-बाग-प्रकरणे हुतिंगतेभ्य: वीरेभ्य: श्रद्धाञ्जलिं समर्पितवन्त:।

· ऑस्ट्रेलियाया: सिडनीनगरे एकस्मिन् आपणे दुरापादिते घटनाक्रमे षड् जनाः मृताः शताधिकाश्च जनाः ततो बहिः निष्कासिताः।

· आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायां अद्य सायंकाले सार्धसप्तवादने चण्डीगढ़े पञ्जाबकिंग्स-राजस्थान-रॉयलदले परस्परं सम्मुखीकरिष्यत: क्रीडार्थम्।

प्रचाराभियानम्

लोकसभा-निर्वाचनस्य प्रथमचरणस्य मतदानात् पूर्वं प्रमुख-राजनीतिक-दलानां नेतृभि: मतदातृन् आक्रष्टुं नवचिनिक-प्रचाराभियानं तीव्रीकृतम्। देशस्य अनेकेषु भागेषु विविध-राजनीतिक-दलानां शीर्ष-नेतार: जनसभा: समागमाश्च कुर्वन्ति। प्रथमे चरणेऽस्मिन् सप्तदश राज्यानां चतुर्णां केन्द्रशासित प्रदेशानां च द्वयधिकै कशतं लोकसभासनै: सह सिक्किमस्य द्वात्रिंशत् विधानसभा सनेभ्य: अरुणाचल-प्रदेशस्य षष्टि: विधानसभा सनेभ्य: मतदानं अस्य मासस्य नवदशदिनांके भविता। भारतीयजनतापार्टीतिदलस्य लब्धप्रतिष्ठिता: नेतार: यथा अमितशाह:, राजनाथसिंह:, जे.पी. नड्डा उत्तर प्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथश्च देशस्य विविधेषु भागेषु नैर्वाचनिकप्रचाराभियाने निरता: सन्ति। भाजपेतिदलस्य वरिष्ठनेता अमितशाह: अद्य प्रात: तमिलनाडो: कन्याकुमार्यां पथप्रदर्शनं कृतवान्। थक्कालाई इत्यत्र निर्वाचन प्रसारं कुर्वन् असौ कथितवान् यत् प्रधानमन्त्री नरेन्द्र मोदी तमिलनाडु-जनेभ्य: चिन्तितो वर्तते यतो हि प्रधानमन्त्री संसदि सेंगोल इति स्थापयित्वा तमिलजनेभ्य: महत्वं प्रदत्तवान्। श्रीशाहेन आरोपित: यत् द्रमुकदलं सनातनधर्मं राममन्दिरं च विरूद्धं वर्तते। तदवदेव बहुसंख्यकजनान् प्रभावितमपि करोति। असौ

अग्रे प्रत्यपादयत् यत् भाजपादलं विकसितभारतदिशि सकलान् वर्गान रक्षयति। तान् च गृहीत्वा कार्यं समाचरति। श्रीशाह: प्रोक्तवान् यत् द्रमुक-कांग्रेसदलयो: सम्बद्धम् प्रवञ्चना स्वरूपमस्ति। भाजपेतिदलस्य प्रशासनेन विगतदशवर्षेषु अनेका: योजना: प्रारब्धा:। श्रीशाह: राजस्थानस्य अलवर जनपदं उत्तरप्रदेशस्य च नोएडाइत्यत्र प्रति च गमिष्यति। अस्य दलस्यैव अपरा नेत्री निर्मला सीतारामन् इत्येषा अद्य तंजावुरे प्रचाराभियानं कृतवती। भाजपादलस्य राष्ट्रियाध्यक्ष: जे.पी.नड्डा: नागालैण्डस्य चुमुकेदिमा एग्री-एक्सपो इत्यत्र एकं समागमं सम्बोधयिष्यति। भाजपादलस्यैव नेता उत्तरप्रदेशस्य च मुख्यमन्त्री योगिआदित्यनाथ: प्रोदीरितवान् यत् अस्माभि: परिवर्तनशील भारतम् अवलोकितम्। श्रीयोगिना अद्य मुरादाबादे जनसभां एकां सम्बोधयता वार्तेयं कथिता। तेलंगानाराज्ये एम्.आई.एम्. दलाध्यक्ष: असदुद्दीन ओवैसी इत्येष: हैदराबाद-लोकसभक्षेत्रस्य विभिन्नेषु स्थलेषु प्रतिद्वारम् अभियानं कृतवान्। कांग्रेसस्य नेत्री प्रियंकागांधी उत्तराखण्डस्य रामनगरे नैर्वाचनिक पथप्रदर्शनं कृतवती।

## प्रशासन-द्विदलं

प्रशासनेन द्विदलानां निजव्यवसाये संलग्नेभ्य: जनेभ्य: आवश्यक-वस्तु-अधिनियमस्य प्रावधानानाम् अन्तर्गतं दण्डस्य प्रत्यादेश: प्रदत्त:। उपभोक्तृ-विषयक-सचिव: निधि: खरे: अप्रैलमासस्य पञ्चदश-दिनात् ऑनलाइन-स्टॉक-मानिटरिंग इत्यस्य सञ्चालनक्रमे द्विदल-उद्योगस्य प्रतिनिधिभि: सह वार्ताविधौ वक्तव्यमिदं कथितवती। द्विदलागाराणां विषये उद्योग विषये उद्योग-जगता प्राप्तसूचनाया: आपणप्रतिनिधिभि: प्राप्तसूचनाया: उपमिति: जाता येनहि द्विदलगारेषु आभासियरूपेण अवधानं दीयताम्।

## जलियांवाला – वीरसैनिका:

देशेन अद्य जलियांवाला-बाग-नरसंहारस्य वीरसैनिका: स्मर्यन्ते। अस्मिन् एव दिने नवदशाधिक नवदशतमे वर्षे ब्रिटिश-जनरल-डायर इत्यनेन भारतस्य पञ्जाबक्षेत्रस्य अमृतसरे बैसाखी उत्सवं मानयितुं जलियांवाला बाग स्थले समागतानां शताधिकानां नि:शस्त्राणां जनानां उपरि गोलिकाप्रहारस्य आदेश: प्रदत्त: आसीत् शताधिका: जना: मारिता: अनेके च व्रणिता: जाता:। राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीपधनखड़ प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीयमन्त्रिणौ अमितशाह-डॉ० एस्. जयशंकरौ च जलियांवाला-बाग-प्रकरणे हुतिंगतेभ्य: वीरेभ्य: श्रद्धाञ्जलिं समर्पितवन्त:।

लद्दाख कारगिल-विजय

लद्दाखे कारगिल-विजयस्य रजत-जयन्तीम् आमानयितुं सूचनाप्रौद्योगिकी मन्त्रालयेन भारतीयसैन्यबलस्य 'फॉर एवर इन' ऑपरेशंस डिवीजन', इत्यनेन च विशेष रेडियो केन्द्रं सफलतापूर्वकं सञ्चालितम्। गतवर्षे अप्रैलमासस्य एकादशे दिने अस्य रेडियो केन्द्रस्य स्थापनायाः उद्देश्यं कारगिल- वास्तव्यानां जनानां भारतीयसैन्यबलस्य च वीरतायाः सम्मानम् अस्ति। सैन्यबलेन सञ्चालितेन रेडियो केन्द्रेण जगति पञ्चाशत् देशैः सह उल्लेखनीय-संबंधाः स्थापिताः। भारतस्य उदारभावनायाः विजयस्य च प्रतीकं अल्फा टैंगो इति दलं भारतस्य प्रतिनिधित्वं विदधाति। अस्मात् रेडियो केन्द्रात् सर्वतो दीर्घ-सञ्चारः संयुक्तराज्य अमेरिकया सह कृतम्। यत् हि कारगिलात् त्रयोदश सहस्र-किलोमिटर-दूरस्थम् विद्यते। कार्यक्रमस्य अंश-रूपेण प्रतिभागाय लद्दाख-विश्वविद्यालयस्य छात्रेभ्यः जागरूकता कार्यक्रमः आयोजितः। अस्योद्देश्यं छात्रेभ्यः परिपक्व- रेडियो केन्द्रस्य कार्यप्रणाल्याः महत्व- शिक्षणम् अवर्तत्।

अनुरागठाकुर: - प्रचाराभियानम्

भाजपेतिदलस्य नेता केन्द्रीयमन्त्री च अनुराग-सिंह-ठाकुर: अद्य मध्यप्रदेशस्य पांढुर्नानगरे विपक्षि-संयुत्या: आलोचनां कुर्वन् उक्तवान् यत् एतस्यां संयुत्यं एक: नेता नास्ति, लक्ष्यम् एकं नास्ति नेतृत्वं एकम् नास्ति विचारधारा-संकल्पश्च एक: नास्ति सम्प्रति च घोषणापत्रमपि एकं नास्ति। पांढुर्नानगरे वार्ताहरै: समं भाषमाण: असौ प्रोक्तवान् यत् राष्ट्रमिदं कदापि विभाजित-संयुतिं नव स्वीकरिष्यति। असौ कांग्रेसदले आदिवासिभि: जनै: सह दुर्व्यवहारस्य आरोपमपि साधितवान्। आमआदमी पार्टी इति दलस्यापि भर्त्सनां कृतवान्।

ऑस्ट्रेलिया:

ऑस्ट्रेलियायाः सिडनी नगरे एकस्मिन् आपणे दुरापादिते घटनाक्रमे षड् जनाः मृताः शताधिकाश्च जनाः ततो बहिः निष्कासिताः। स्रोतोभिः सूचितं यत् आरक्षिभिः एकः आरोपि गोलिकाभिः मारितः।घटनायाः अनन्तरम् आरक्षिभिः विपणन-परिसरः पिहितः। प्रत्यक्षदर्शिभिः सूचितं यत् घटनायाः समये तत्र जनसम्मर्दः प्रवृत्तः। जनाश्च सुरक्षितस्थलं प्रति प्रस्थिताः। जनानां सुरक्षायै तत्र अभियानं प्रवृत्तमस्ति।

आई.पी.एल.

आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायां अद्य सायंकाले सार्धसप्तवादने चण्डीगढ़े पञ्जाबकिंग्स-राजस्थान-रॉयलदले परस्परं सम्मुखीकरिष्यति क्रीडार्थम्। ह्यः लखनऊ नगरे डेल्ही-कैपिटल्स दलेन लखनऊसुपरजायंट्सदलं षड्स्तोभैः पराजितम्।

।। इति वार्ताः ।।